ऽविकलदशनो मातृहीनोऽसुतोऽज्ञः सिंहे५ऽनार्य्यो विसुखतनयो विट्कृत् सूर्य्यपुत्रे। स्वल्पप्रत्ययितो नरेन्द्रभवने सत्पुत्रजायाधनो जीवश्चेत्र९।१२गतेऽर्कजे पुरबलग्रामाग्रनेताऽथ वा। अन्यस्त्रीधनसंवृतः पुरबलग्रामाग्रणीर्मन्ददृक्स्वक्षेत्रे१० ११। मलिनस्थिरार्थविभवो भोक्ता च जातः पुमान्। श०। शिशिरकरसमानमीक्षणानां सदृशफलं प्रवदन्ति लग्नजातम्। फलमधिकमिदं यदत्र तत्तद्भवनभनाथगुणैर्विचिन्तनीयम्"।

लग्नतदंशयोर्ग्रहदृष्टिफलम् १९अ० तत्रैवोक्तं यथा "चन्द्रे भूपबुधौ नृपोपमगुणी स्तेनोऽधनश्चा१जगे निःस्वः स्तेन नृमान्यभूपधनिनः प्रेष्यः कुजाद्यैर्गवि२। नृस्थे३ऽयोव्यवहारिपार्थिवबुधाभीस्तन्तुवायो धनी स्वर्क्षे४ योद्धृकविज्ञभूमिपतयोऽयोजीविदृग्रोगिणौ। ज्योतिर्ज्ञाढ्यनरेन्द्रनापितनृपक्ष्मेशा बुधाद्यैर्हरौ५ तद्वद्भूपचमूपनैपुणयुताः षष्ठे६ शुभैस्तत्राश्रयः। जूके७ भूपसुवर्णकारवणिजः शेषेक्षिते नैकृती, कीटे८ युग्मपिता नतश्च रजकोऽव्यङ्गोऽधनो भूपतिः। ज्ञात्युर्वीशजनाश्रयश्च तुरगे९ पापैः सदम्भः शठश्चाप्युर्वीशनरेन्द्रपण्डितधनी द्रव्योनभूपो मृगे१०। भूपो भूपसमोऽन्यदारनिरतः शेषैश्च कुम्भस्थिते११ हास्यज्ञो नृपतिर्बुधश्च झषगे१२ पापश्च पापेक्षिते। होरेशर्क्षदलाश्रितैः शुभकरो दृष्टः शशी तद्गतस्त्र्यंशे तत्पतिभिः सुहृद्भवनगैर्वा वीक्षितः शस्यते। यत् प्रोक्तं प्रतिराशिवीक्षणफलं तद्द्वादशांशे स्मृतं सूर्य्याद्यैरवलोकितेऽपि शशिनि ज्ञेयं नवांशेष्वतः। आरक्षिको वधरुचिः कुशलो नियुद्धे भूपोऽर्थवान् कलहकृत् क्षितिजांशसंस्थे। मूर्खोऽन्यदारनिरतः सुकविः सितांशे सत्काव्यकृत् सुखपरोऽन्यकलत्रगश्च। बौधे हि रङ्गचरचौरकवीन्द्रमन्त्री गेयज्ञशिल्पनिपुणः शशिनि स्थितेऽंशे। स्वांशेऽल्पगात्रधनलुब्धतपस्विमुख्यः स्त्रीपोष्यकृत्यनिरतश्च निरीक्ष्यमाणे। सक्रोधो नरपतिसंमतो निधीशः सिंहांशे प्रभुरसुतोऽतिहिंस्रकर्मा। जीवांशे प्रथितबलो रणोपदेष्टा हास्यज्ञः सचिवविकामवृद्धशीलः। अल्पापत्यो दुःखितः सत्यपि स्वे मानासक्तः कर्मणि स्वेऽनुरक्तः। दुष्टस्त्रीष्टः कार्पणश्चार्किभागे चन्द्रे मानौ तद्वदिन्द्रादिदृष्टे। वर्गोत्तमस्वपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताशुभमुत्क्रमेण। वीर्य्यान्वितोऽंशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति"।

जन्मादिद्वादशभावस्थसूर्य्यादिग्रहफलम् तत्रैव२०अ०उक्तं यथा

"शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे मेषे सस्वोऽस्तिमिरनयनः सिंह५संस्थे निशान्धः। नीचे७ऽन्धोऽस्वः शशिगृह४गते बुद्बुदाक्षः पतङ्गे भूरिद्रव्यो नृपहृतधनो वक्त्ररोगी द्वितीये२। मतिविक्रमवान् तृतीय३गेऽर्के विसुखपीडितमानसश्चतुर्थे४। असुतो धनवर्जितस्त्रिकोणे५ बलवाञ्छत्रुजितश्च शत्रु६याते। स्त्रीभिर्गतः परिभवं मदगे७ पतङ्गे स्वल्पात्मजो निधनगे८ विकलेक्षणश्च। धर्मे९ सुखार्थसुखभाक् सुतशौर्य्यभाक् खे१० लाभे११ प्रभूतधनवान् पतितस्तु रिष्फे१२। सू०। मूकोन्मत्तजडान्धहीनबधिरप्रेष्याः शशाङ्कोदये१ स्वर्क्षाजोच्चगते धनी बहुसुतः सस्वः कुटुम्बी धने२। हिंस्रो भ्रातृ३गते सुखे सतनये५ तत्प्रोक्तभावान्वितो नैकारिर्मृदुकायवह्निमदनस्तीक्ष्णोऽलसश्चारिगे६। ईर्ष्युस्तीव्रमदो मदे७ बहुमतिर्व्याध्यर्दितश्चाष्टमे८ सौभाग्यात्मजमित्रबन्धुधनभाक् धर्मे९स्थिते शीतगौ। निष्पत्तिं समुपैति धर्मधनधीशौर्य्यैर्युतः कर्मगे१० ख्यातो भावगुणान्विते भव११गते क्षुद्रोऽङ्गहीनो व्यये१२। च०। "लग्ने१ कुजे क्षततनुर्धनगे२ कदन्नो धर्मे९ऽघवान् खरकरप्रतिमोऽन्यसंस्थः। म०। विद्वान् धनी प्रबलपण्डितमन्त्रशत्रुर्धर्म्मज्ञविश्रुतगुणः परतोऽर्कवज्ज्ञे। बु०। विद्वान् सुवाक्यः कृपणः सुखी च धीमानशत्रुः पितृतोऽधिकश्च। नीचस्तपस्वी सधनः सलाभः खलश्च जीवे क्रमशो विलग्नात्। वृ०। स्मरनिपुणः सुखितश्च विलग्ने प्रियकलहोऽस्त७गते सुरतेप्सुः। तनय५गते सुखितो भृगुपुत्रे गुरुवदतोऽन्यगृहे द्रविणी स्यात्। शु०। अदृष्टार्थो रोगी मदनवशगोऽत्यन्तमलिनः शिशुत्वे पीडार्त्तः सवितृसुतलग्नेऽत्यलसवाक्। गुरु९।१२स्व१०।११स्त्रीञ्च७स्थे नृपतिसदृशो ग्रामपुरपः सुविद्वांश्चावङ्गोदिनकरसमोऽन्यत्र कथितः। श०। सुहृदरिपरकीयस्वर्क्षतुङ्गस्थितानां फलमनु परिचिन्त्य लग्नदेहादिभावैः। समुपचयविपत्ती सौम्यपापेषु सत्यः कथयति विपरीतं रिष्फषष्ठाष्टमेषु। उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः शुभं संपूर्णपादोनदलपादाल्पनिःफलम्"।

आश्रयफलं तत्रैव २१अ० उक्तं यथा।

"कुलसमकुलमुख्यबन्धुपूज्या धनिसुखिभोगिनृपाः स्वभैकदृष्ट्या। परविभवसुहृत्स्वबन्धुपोष्या गणपबलेशनृपाश्च मित्रभेषु। जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः प्रचुरधनसमेतं मित्रयोगाच्च सिद्धम्। विधनविसुखमूढव्याधितो बन्धतप्तो वधदुरितसमेतः शत्रुनीचर्क्षगेषु। न